| अथालङ्कारनामानि | तल्लक्षणानि | तदुदाहरणानि |
|---|---|---|
| चित्रकाव्यमनेकविधं यथा। पद्म-छत्र-धनुः-खड्ग-नागपाश-कवाट-नौका-बन्धाः। अश्वगति-त्रिपदी-गोमूत्रिकादयः। | | |
| छेकापह्नुतिः —— ४१ | "छेकापह्नुतिरन्यस्य शङ्कातस्तस्य निह्नवे"। ४१ | "प्रजल्पन् मत्पदे लग्नः कान्तः किं न हि नूपुरः"॥ ४१ |
| तद्गुणः —— ४२ | "तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः"। ४२ | "पद्मरागायते नासामौक्तिकं तेऽधरत्विषा"॥ ४२ |
| तुल्ययोगिता —— ४३ | | |
| सा त्रिधा। | | |
| प्रथमा यथा —— | "वर्ण्यानामितरेषां वा धर्म्मैक्यं तुल्ययोगिता"। | "सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च।<br>त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते।<br>मालतीशशभृल्लेखा कदलीनां कठोरता॥ |
| द्वितीया यथा —— | "हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता। | प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया॥ |
| तृतीया यथा —— | गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता" ।४३ | लोकपालो यमः पाशी श्रीदः शक्रो भवानपि" ॥ ४३ |
| दीपकं —— ४४ | "वदन्ति वर्ण्यावर्ण्यानां धर्म्मैक्यं दीपकं बुधाः" ।४४ | "मदेन भाति कलभः प्रतापेन महीपतिः" ॥ ४४ |
| दृष्टान्तः —— ४५ | "चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः"। ४५ | "त्वमेव कीर्त्तिमान्राजन् विधुरेव हि कान्तिमान्"॥४५ |
| निदर्शना —— ४६<br>सा त्रिधा। | "वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।<br>पदार्थगर्भामप्यन्ये वदन्त्यन्यां निदर्शनां॥<br>अपरां बोधनं प्राहुः क्रिययासत्सदर्थयोः"। ४६ | "या दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता॥<br>त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः॥<br>नश्यद्राजविरोधीति क्षीणं चन्द्रोदये तमः" ॥ ४६ |
| निरुक्तिः —— ४७ | "निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनं"। ४७ | "ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्" ॥ ४७ |
| परिकरः —— ४८ | "अलङ्कारः परिकरः साभिप्रायविशेषणे"। ४८ | "सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः" ॥ ४८ |
| परिकराङ्कुरः —— ४९ | "साभिप्रायविशेष्यश्चेद्भवेत् परिकराङ्कुरः"। ४९ | "चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः" ॥ ४९ |
| परिणामः —— ५० | "परिणामः क्रियार्थश्चेद्विषयी विषयात्मना"। ५० | "प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा" ॥ ५० |
| परिवृत्तिः —— ५१ | "परिवृत्तिर्व्विनिमयो न्यूनाभ्यधिकयोर्म्मिथः"। ५१ | "ययावेकं शरं मुक्त्वा कटाक्षान् स रिपुस्त्रियाः" ॥५१ |
| परिसंख्या —— ५२ | "परिसंख्या निषिध्यैकमेकस्मिन् वस्तुयन्त्रणं"। ५२ | "स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवां" ॥ ५२ |
| पर्य्यस्तापह्नुतिः —— ५३ | "अन्यत्र तस्यारोपार्थः पर्य्यस्तापह्नुतिस्तु सा"। ५३ | „नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं" ॥ ५३ |
| पर्य्यायः —— ५४<br>स द्विविधः। | "पर्य्यायो यदि पर्य्यायेणैकस्यानेकसंश्रयः।<br>"एकस्मिन् यस्यानेकं वा पर्य्यायः सोऽपि सम्मतः"॥५४ | "पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनप्रभा॥<br>अधुना पुलिनं तत्र यत्र स्रोतः पुराजनि" ॥ ५४ |
| पर्य्यायोक्तं —— ५५<br>तत् द्विविधं। | "पर्य्यायोक्तं तु गम्यस्येह वचोभङ्ग्यान्तराश्रयः।<br>पर्य्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनं" ॥ ५५ | नमस्तस्मै कृतो येन मुधा राहुवधूकुचौ॥<br>यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह" ॥ ५५ |
| पिहितं —— ५६ | "पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितं"। ५६ | "प्रिये गृहागते प्रातः कान्ता तल्पमकल्पयत्" ॥५६ |
| पुनरुक्तवदाभासः —— ५७ | "आपाततो यदर्थस्य पौनरुक्त्यावभासनं।<br>पुनरुक्तवदाभासः स भिन्नाकारशब्दगः" ॥ ५७ | "भुजङ्गकुण्डलीव्यक्तशशिशुभ्रांशुशीतगुः।<br>जगन्त्यपि सदा पायादव्याच्चेतोहरः शिवः" ॥ ५७ |
| पूर्व्वरूपः —— ५८<br>स द्विविधः। | "पुनः स्वगुणसंप्राप्तिः पूर्व्वरूपमुदाहृतं।<br>पूर्व्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि" ॥ ५८ | हरकण्ठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः॥<br>दीपे निर्व्वापितेऽप्यासीत् काञ्चीरत्नैर्महर्महः" ॥५८ |
| प्रतिवस्तूपमा —— ५९ | "वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता"। ५९ | "तापेन भ्राजते सूर्य्यः शूरश्चापेन राजते" ॥ ५९ |
| प्रतिषेधः —— ६० | "प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनं"। ६० | "न द्यूतमेतत् कितवाक्रीडनं निशितैः शरैः" ॥ ६० |
| प्रतीपं —— ६१<br>तल्लक्षणभेदेन पञ्चविधं। न तु नामभेदेन। | "प्रतीपमुपमानस्याप्युपमेयत्वकल्पनं।<br>अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत्॥<br>वर्ण्योपमानलाभेन तथान्यस्याप्यनादरः।<br>वर्ण्येनान्यस्योपमाया अनिष्पत्तिर्वचश्च तत्॥<br>प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते"। ६१ | "तल्लोचनसमं पद्मं तद्वक्त्रसदृशो विधुः।<br>अलं गर्व्वेण ते वक्त्रकान्त्या चन्द्रो भवादृशः।<br>कः क्रौर्य्यदर्पस्ते मृत्यो त्वत्तुल्याः सन्ति हि स्त्रियः॥<br>मिथ्यावादो हि मुग्धाक्षि त्वन्मुखाभं किलाम्बुजं।<br>दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना" ॥ ६१ |
| प्रत्यनीकं —— ६२ | "प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः"। ६२ | "जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ" ॥ ६२ |
| प्रस्तुताङ्कुरः —— ६३ | "प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः"। ६३ | "किं भृङ्ग सत्यां मालत्यां केतक्या कण्टकस्थया" ॥ ६३ |
| प्रहर्षणं —— ६४<br>तत् त्रिविधं। | "उत्कण्ठितार्थसंसिद्धिर्व्विना यत्नं प्रहर्षणं।<br>वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणं॥<br>यत्नादुपायसिद्धार्थात् साक्षाल्लाभः फलस्य तत्"॥६४ | "तामेव ध्यायते तस्मै विसृष्टा सैव दूतिका॥<br>दीपमुद्दीपयेद्यावत्तावदभ्युदितो रविः॥<br>निध्यञ्जनौषधीमूलं खनतासादितो निधिः" ॥ ६४ |
| प्रौढोक्तिः —— ६५ | "प्रौढोक्तिरुत्कर्षहेतौ तद्धेतुत्वप्रकल्पनं"। ६५ | "कचाः कलिन्दजातीरतमालस्तोममेचकाः" ॥ ६५ |
| भाविकं —— ६६ | "भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनं"। ६६ | "अहं विलोकयेऽद्यापि युध्यन्तेऽत्र सुरासुराः" ॥ ६६ |
| भाषासमावेशः —— ६७ | "शब्दैरेकविधैरेव भाषासु विविधास्वपि।<br>वाक्यं यत्र भवेत् सोऽयं भाषासम इतीष्यते" ॥६७ | "गुञ्जन्मणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे।<br>विरसासि केलिकीरे किमालि धीरे च गन्धसार-समीरे" ॥ ६७ |